योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः २८

अष्टाविंशः सर्गः २८

श्रीवसिष्ठ उवाच ।

इत्युक्त्वा भगवान्देवांस्तत्रैवान्तर्धिमाययौ ।

वेलावनितटे शब्दं कृत्वेवाम्बुतरङ्गकः ।। १

सुरास्त्वाकर्ण्य तद्वाक्यं जग्मुः स्वाभिमतां दिशम् ।

कमलामोदमादाय वनमालामिवानिलाः ।। २

दिनानि कतिचित्स्वेषु कान्तेषु स्थिरकान्तिषु ।

द्विरेफा इव पद्मेषु मन्दिरेषु विशश्रमुः ।। ३

कंचित्कालं समासाद्य स्वात्मोदयकरं शुभम् ।

चक्रुर्दुन्दुभिनिर्घोषं प्रलयाभ्ररवोपमम् ।। ४

अथ दैत्यैर्ममाव्योम्नि तैः पातालतले स्थितैः ।

कालक्षेपकरं घोरं पुनर्युद्धमवर्तत ।। ५

ववुरसिशरशक्तिमुद्गरौघा

मुसलगदापरशूग्रचक्रशङ्खाः ।

अशनिगिरिशिलाहुताशवृक्षा

अहिगरुडादिमुखानि चायुधानि ।। ६

मायाकृतायुधमहाम्बुघनप्रवाहा

क्षिप्रावहा प्रतिदिशं किल निर्जगाम ।

पाषाणपर्वतमहीरुहलक्षवृक्ष-

क्षुब्धाम्बुपूरघनघोषवती नदी द्राक् ।। ७

मध्यप्रवाहवहदुल्मुकशूलशैल-

प्रासासिकुन्तशरतोमरमुद्गरौघा

गङ्गोपमाम्बुवलितामरमन्दिरेण

सर्वासु दिक्ष्वशनिवर्षनिकर्षणेन ।। ८

पृथ्व्यादिदारुणशरीरमपि प्रहार-

दानग्रहा गहनराशिशरीरकेव ।

मायोपशाम्यति सुरासुरसिद्धसन्ना

मायाकृतिः पुनरुदेति नचैव सैव ।। ९

शैलोपमायुधविघट्टितभूधराणि

रक्ताम्बुपूरपरिपूर्णमहार्णवानि ।

दैवासुरेन्द्रशवशैलविरूढकुन्त-

तालीवनानि ककुभां वदनानि चासन् ।।१०

उद्गीर्णकुन्तशरशक्तिगदासिचक्र-

हेलानिगीर्णसुरदानवमुक्तशैला ।

काषोल्लसत्क्रकचदन्तनखाग्रमाला

जीवान्विता ह्यपतदायससिंहसृष्टिः ।। ११

उज्ज्वाललोचनविषज्वलनातपौघ-

दिग्दाहदर्शितयुगान्तदिनेशसेना ।

उड्डीयमानपरिदीर्घमहामहीध्र-

मग्नाब्धिवद्विषधरावलिरुल्ललास ।। १२

उन्नादवज्रमकरोत्करकर्कशान्तः-

क्षुब्धाब्धिवीचिवलयैर्वलिताचलेन्द्रैः ।

आसीज्जगत्सकलमेव सुसंकटाङ्ग-

मावृत्तिभिर्विविधहेतिनदीप्रवाहैः ।। १३

शैलास्त्रशस्त्रगरुडाचलचालितोच्च-

नागं महासुरगणाङ्गणमन्तरिक्षम् ।

आसीत्क्षणं जलधिभिः क्षणमग्निपूरैः

पूर्णं क्षणं दिनकरैः क्षणमन्धकारैः ।। १४

गरुडगुडगुडाकुलान्तरिक्ष-

प्रविसृतहेतिहुताशपर्वतौघैः ।

जगदभवदसह्यकल्पकाले

ज्वलितसुरालयभूतलान्तरालम् ।। १५

उदपतन्नसुरावसुधातला-

द्गगनमद्रितटादिव पक्षिणः ।

अतिबलादपतन्विबुधा भुवि

प्रलयचालितशैलशिला इव ।। १६

शरीररूढोन्नतहेतिवृक्ष-

वनावलीलग्नमहाग्निदाहाः ।

सुरासुराः प्रापुरथाम्बरान्तः

कल्पानिलान्दोलितशैलशोभाम् ।। १७

सुरासुराद्रीन्द्रशरीरमुक्तै

रक्तप्रवाहैरभितो भ्रमद्भिः ।

बभार पूर्णं परितोऽम्बरोऽद्रेः

संध्याकरौघक्षतमङ्ग गङ्गाम् ।। १८

गिरिवर्षणमम्बुवर्षणं

विविधोग्रायुधवर्षणं तथा ।

विषमाशनिवर्षणं च ते

सममन्योन्यमथाग्निवर्षणम् ।। १९

अनयन्नयमार्गकोविदा

दलिताशेषगिरीन्द्रभित्तयः ।

ससृजुश्च समं समन्ततः

करिकुम्भेष्विव पुण्यवर्षणम् ।। २०

देवासुराः समरसंभ्रममाकुलास्ते

अन्योन्यमङ्गदलनाकुलहेतिहस्ताः ।

नागेन्द्रडिम्भपृतनापृथुपीठपेषैः

कीर्णश्रियो नभसि बभ्रमुरक्षिपन्तः ।। २१

छिन्नैः शिरःकरभुजोरुभरैर्भ्रमद्भि-

राकाशकाष्ठशलभैरशिवैस्तदानीम् ।

आसीज्जगज्जठरमभ्रभरैरिवोग्रै-

राभास्करस्थगितदिक्तटशैलजालम् ।। २२

रटद्भटास्फोटकटिस्फुटद्भिः

समीरितैर्हेतिकलासितौघैः ।

परस्पराघातहतैः पतद्भि-

र्जगाम शीर्णा दलशो धरित्री ।। २३

अन्योन्यमायुधशिलाचलवृक्षवर्षै-

र्मेरुप्रमाणकठिनाङ्गनिघर्षणैश्च ।

आसीद्रणं चटचटास्फुटदन्तरिक्षं

कल्पक्षयान्तमिव भीमभरोग्रनादैः ।। २४

मत्तानिलक्षुब्धजलानलार्क-

दलद्द्वयं दीर्घसुरासुरौघम् ।

ब्रह्माण्डमाखण्डितकुड्यकोण-

सकालकल्पान्तकरालमासीत् ।। २५

भ्रान्तैर्भृशं भरितदिक्तटमद्रिकूटै-

रात्मप्रमाणघनहेतिहतै रणद्भिः

कूजद्भिरार्तिभिरिवोग्रगुहोच्चवातैः

क्रन्दद्भिरापतितसिंहरवैरदभ्रैः ।। २६

मायानदीजलधियोधघनाग्निदाहै-

र्वृक्षैः सुरासुरशवैरचलैः शिलोच्चैः ।

भ्रान्तेः शरासिशितशक्तिगदास्त्रशस्त्रै-

र्वातावकीर्णवनपर्णवदन्तरन्तः ।। २७

अद्रीन्द्रपक्षपरिमाणगमाक्षमोक्त-

दुर्वारहस्तिबलदारुणदेहकैर्द्राक् ।

आसीत्पतद्भटशरीरगिरीन्द्रवात-

विभ्रष्टदेवपुरपूर्णजलार्णवौघम् ।। २८

घनघुंघुमपूरितान्तरिक्षा

क्षतजक्षालितभूधरा धरा च ।

रुधिरह्रदवृत्तिवर्तिनी वा

भुवनाभोगगुहा तदाकुलाभूत् ।। २९

अनन्तदृक्प्रसृतविकारकारिणी

क्षयोदयोन्मुखसुखदुःखशंसिनी ।

रणक्रियासुरसुरघट्टसंकटा

तदाभवत्खलु सदृशीह संसृतेः ।। ३०

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० स्थितिप्रकरणे दामव्यालकटपुनर्युद्धवर्णनं नामाष्टाविंशः सर्गः ।। २८ ।।